# গাযত্রীহৃদযম্

{॥ গাযত্রীহৃদযম্ ॥}

ॐ নমস্কৃত্য ভগবান্ যাজ্ঞবল্ক্যঃ স্বযম্ভুবং পরিপৃচ্ছতি ।

ত্বং নো ব্রূহি ব্রহ্মন্ গাযত্র্যুৎপত্তিং-তুরীযাং শ্রোতুমিচ্ছামি ।

ব্রহ্মজ্ঞানোৎপত্তিং প্রকৃতিং পরিপৃচ্ছামি ॥ ১॥

শ্রী ভগবানুবাচ ।

প্রণবেন ব্যাহৃতযঃ প্রবর্তন্তে তমসস্তু পরং জ্যোতিঃ ।

কঃ পুরুষঃ ? স্বযম্ভূর্বিষ্ণুরিতি ।

অথ তাঃ স্বাঙ্গুল্যা মথ্নাতি । মথ্যমানাত্ ফেনো ভবতি ।

ফেনাদ্ বুদ্বুদো ভবতি। বুদ্বুদাদণ্ডং ভবতি । অণ্ডাত্ আত্মা ভবতি ।

আত্মন আকাশো ভবতি । আকাশাদ্বাযুর্ভবতি । বাযোর্গ্নির্ভবতি ।

অগ্নেরোঙ্কারো ভবতি । ওঙ্কারাদ্ ব্যাহৃতির্ভবতি ।

ব্যাহৃত্যা গাযত্রী ভবতি । গাযত্র্যাঃ সাবিত্রী ভবতি ।

সাবিত্র্যাঃ সরস্বতী ভবতি । সরস্বত্যা বেদাঃ ভবন্তি ।

বেদেভ্যো ব্রহ্মা ভবতি । ব্রহ্মণো লোকা ভবন্তি । তস্মাল্লোকাঃ প্রবর্তন্তে ।

চত্বারো বেদাঃ সাঙ্গাঃ সোপনিষদঃ সেতিহাসাস্তেসর্বে গাযত্র্যাঃ প্রবর্তন্তে ।

যথাগ্নির্দেবানাং, ব্রাহ্মণো মনুষ্যাণাং, মেরুঃ শিখরিণাং, গঙ্গা নদীনাং,

বসন্ত ঋতূণাং, ব্রহ্মা প্রজাপতীনাং, এবমসৌ মুখ্যঃ ।

গাযত্র্যা গাযত্রীছন্দো ভবতি ॥ ২॥

কিং ভূঃ ? কিং ভুবঃ ? কিং স্বঃ ? কিং মহঃ ? কিং জনঃ ?

কিং তপঃ ? কিং সত্যম্ ? কিং তত্ ? কিং সবিতুঃ ?

কিং বরেণ্যম্ ? কিং ভর্গঃ ? কিং দেবস্য ? কিং ধীমহি ?

কিং ধিয়ঃ ? কিং যঃ ? কিং নঃ ? কিং প্রচোদযাত্ ? ॥ ৩॥

ভূরিতি ভূর্লোকো, ভুব ইত্যন্তরিক্ষলোকঃ, স্বরিতি স্বর্লোকো,

মহরিতি মহর্লোকো, জন ইতি জনো লোকঃ, তপ ইতি তপো লোকঃ,

সত্যমিতি সত্যলোকঃ, ভূর্ভুবঃ সব্রিতি ত্রৈলোক্যং তদিতি

তেজো যত্তেজসোঽগ্নির্দেবতা সবিতুরিত্যাদিত্যস্য

বরেণ্যমিত্যন্নম্ অন্নমেব প্রজাপতিঃ । ভর্গ ইত্যাপঃ, আপো বৈ ভর্গঃ ।

যদাপস্তত্ সর্বা দেবতাঃ । দেবস্য সবিতুর্দেবো বা যঃ পুরুষঃ স বিষ্ণুঃ ।

ধীমহীত্যৈশ্বর্যং, যদৈশ্বর্যং স প্রাণ ইত্যধ্যাত্মং, তদধ্যাত্মম্ ।

তত্ পরমং পদং, তন্মহেশ্বরঃ, ধিয ইতি মহীতি । পৃথিবী মহী ।

যো নঃ প্রচোদযাদিতি কামঃ । কাম ইমান্ লোকান্ প্রচ্যাযবতে ।

যো নৃশংসঃ । যোঽনৃশংসোঽস্যাঃ স পরো ধর্ম ইত্যেষা বৈ গাযত্রী ॥ ৪॥

কিং গোত্রা ? কত্যক্ষরা ? কতি পাদা ? কতি কুক্ষিঃ ? কতি শীর্ষা ? ॥ ৫॥

সাঙ্খ্যাযন গোত্রা, চতুর্বিংশত্যক্ষরা বৈ গাযত্রী,

ত্রিপদা, ষটকুক্ষিঃ, পঞ্চ শীর্ষা ॥ ৬॥

কেঽস্যাস্ত্রযঃ পাদা ভবন্তি ? কা অস্যা ষট্ কুক্ষযঃ ?

কানি চ পঞ্চ শীর্ষাণি ? ॥ ৭॥

ঋগ্বেদোঽস্যাঃ প্রথমঃ পাদো ভবতি, যজুর্বেদো দ্বিতীযঃ সামবেদস্তৃতীযঃ ।
পূর্বা দিক্ প্রথমা কুক্ষির্ভবতি । দক্ষিণা দ্বিতীযা, পশ্চিমা তৃতীযা,
উত্তরা চতুর্থী, ঊর্ধ্বা পঞ্চমী, অধোঽস্যাঃ ষষ্ঠী ।
ব্যাকরণমস্যাঃ প্রথমং শীর্ষাং ভবতি, শিক্ষা দ্বিতীযং,
কল্পস্তৃতীযং, নিরুক্তং চতুর্থং, জ্যোতিষামযনমিতি পঞ্চমম্ ॥ ৮॥

কিং লক্ষণম্ ? কিং বিচেষ্টিতম্ ? কিমুদাহৃতম্ ? ॥ ৯॥

লক্ষণং মীমাংসা, অথর্ববেদো বিচেষ্টিতং, ছন্দো বিচিতিরুদাহৃতম্ ॥ ১০॥

কো বর্ণঃ ? কঃ স্বরঃ ? শ্বেতো বর্ণঃ ষট্ স্বরাঃ ॥ ১১॥

পূর্বা ভবতি গাযত্রী, মধ্যমা সাবিত্রী, পশ্চিমা স্নধ্যা সরস্বতী ।
রক্তা গাযত্রী, শ্বেতা সাবিত্রী, কৃষ্ণা সরস্বতী ॥ ১২॥

প্রণবে নিত্যযুক্তা স্যাদ্ ব্যাহৃতিষু চ সপ্তসু ।
সর্বেষামেব পাপানাং সঙ্করে সমুপস্থিতে ।
শতসাহস্রমভ্যস্তা গাযত্রী পাবনং মহত্ ॥ ১৩॥

উষঃ কালে রক্তা, মধ্যাহ্নে শ্বেতাঽপরাহ্নে কৃষ্ণা ।

পূর্ব সন্ধি ব্রাহ্মী, মধ্য সন্ধি মাহেশ্বরী, পরা সন্ধি বৈষ্ণবী।

হংসবাহিনী ব্রাহ্মী, বৃষবাহিনী মাহেশ্বরী, গরুডবাহিনী বৈষ্ণবী ॥ ১৪॥

পূর্বাহ্মকালে সন্ধ্যা গাযত্রী, কুমারী রক্তাঙ্গী রক্তবাসাস্ত্রিনেত্রা

পাশাঙ্কুশাক্ষমালা কমণ্ডলুকরা হংসারূঢা ঋগ্বেদসহিতা,

ব্রহ্মদৈবত্যা ভূর্লোক ব্যবস্থিতাদিত্যপথগামিনী ॥ ১৫॥

মধ্যাহ্নকালে সন্ধ্যা সাবিত্রী যুবতী শ্বেতাঙ্গী শ্বেতবাসাস্ত্রিনেত্রা

পাশাঙ্কুশত্রিশূলডমরুহস্তা বৃষভারূঢা যজুর্বেদসহিতা,

রুদ্রদৈবত্যা ভুবর্লোক ব্যবস্থিতাদিত্যপথগামিনী ॥ ১৬॥

সাযাহ্মকালে সন্ধ্যা সরস্বতী বৃদ্ধ কৃষ্ণাঙ্গী,

কৃষ্ণবাসাস্ত্রিনেত্রা শঙ্খ-গদা-চক্র-পদ্মহস্ত-গরুডারূঢা

সামবেদসহিতা বিষ্ণু-দৈবত্যা স্বর্লোক ব্যবস্থিতাদিত্যপথগামিনী ॥ ১৭॥

কান্যক্ষর দৈবতানি ভবন্তি ? ॥ ১৮॥

প্রথমমাগ্নেযং, দ্বিতীযং প্রাজাপত্যং, তৃতীযং সৌম্যং,

চতুর্থমৈশানং, পঞ্চমাদিত্যং, ষষ্ঠং বার্হস্পত্যং,

সপ্তমং ভগদৈবত্যং, অষ্টমং পিতৃদৈবত্যং, নবমমর্যমণং,

দশমং সাবিত্রং, একাদশং ত্বাষ্ট্রং, দ্বাদশং পৌষ্ণং,

ত্রযোদশমৈন্দ্রাগ্নং, চতুর্দশং বাযব্যং, পঞ্চদশং বামদেব্যং,

ষোডশং মৈত্রাবরুণং, সপ্তদশং বাভ্রব্যং,

অষ্টাদশং বৈশ্বদেব্যং, একোনবিংশতিকং বৈষ্ণব্যং,

বিংশতিকং বাসবং, একবিংশতিকং তৌষিতং,

দ্বাবিংশতিকং কৌবেরং, ত্রয়োবিংশতিকং আশ্বিনং,

চতুর্বিংশতিকং ব্রাহ্মং ইত্যক্ষরদৈবতানি ভবন্তি ॥ ১৯॥

দ্যৌর্মূর্ধ্নিসঙ্গতাস্তে, ললাটে রুদ্রঃ,

ভ্রুবোর্মেঘঃ চক্ষুশোশ্চন্দ্রাদিত্যৌ,

কর্ণযোঃ শুক্রবৃহস্পতী, নাসিকে বায়ুদৈবত্যে,

দন্তৌষ্ঠাবুভযসন্ধ্যে, মুখমগ্নিঃ,

জিহ্বা সরস্বতী, গ্রীবাসাধ্যানুগৃহীতিঃ, স্তনযোর্বসবঃ, বাহ্বোর্মরুতঃ,

হৃদযং পর্জন্যমাকাশমুদরং, নাভিরন্তরিক্ষং,

কট্যোরিন্দ্রাগ্নী, জঘনং প্রাজাপত্যং, কৈলাসমলযাবূরু,

বিশ্বেদেবা জানুনী, জহ্নুকুশিকৌ জঙ্ঘাদ্বযং, খুরাঃ পিতরাঃ,

পাদৌ বনস্পতযঃ, অঙ্গুলযো রোমাণি, নখাশ্চ মুহূর্তাস্তেঽপি গ্রহাঃ,

কেতুর্মাসা ঋতবঃ, সন্ধ্যাকালস্তথাচ্ছাদনং সংবৎসরো

নিমিষমহোরাত্র আদিত্যশ্চন্দ্রমাঃ ॥ ২০॥

সহস্রপরমাং দেবীং শতমধ্যাং দশাবরাং ।

সহস্রনেত্রাং গাযত্রীং শরণমহং প্রপদ্যে ॥ ২১॥

ওঁ তৎসবিতুর্বরেণ্যায নমঃ । ওঁ তত্ পূর্ব জযায নমঃ ।

ॐ তত্ প্রাতরাদিত্য প্রতিষ্ঠায নমঃ ॥ ২২॥

সাযমধীযানো দিবসকৃতং পাপং নাশযতি ।

প্রাতরধীযানো রাত্রিকৃতং পাপং নাশযতি ।

তত্ সাযং প্রাতরধীযানোঽপাপো ভবতি ॥ ২৩॥

য ইদং গাযত্রীহৃদযং ব্রাহ্মণঃ পঠেত্ অপেযপানাত্ পূতো ভবতি ।

অভক্ষ্যভক্ষণাত্ পূতো ভবতি । অজ্ঞানাত্ পূতো ভবতি ।

স্বর্ণস্তেযাত্ পূতো ভবতি । গুরু তল্পগমনাত্ পূতো ভবতি ।

অপঙ্ক্তি পাবনাত্ পূতো ভবতি । ব্রহ্মহত্যাযাঃ পূতো ভবতি ।

অব্রহ্মচারী ব্রহ্মচারী ভবতি । ইত্যনেন হৃদযেনাধীতেন

ক্রতু সহস্রেণেষ্টো ভবতি ।

ষষ্টি শতসহস্রাণি জপ্যানি ফলানি ভবন্তি অষ্টৌ ব্রাহ্মণান্

সম্যগ্ গ্রাহযেদর্থসিদ্ধির্ভবতি ॥ ২৪॥

য ইদং নিত্যমধীযানো ব্রাহ্মণঃ প্রযতঃ শুচিঃ সর্বপাপৈঃ প্রমুচ্যতে ইতি ।

ব্রহ্মলোকে মহীযতে ইত্যাহ ভগবান্ যাজ্ঞবল্ক্যঃ ॥ ২৫॥

॥ ইতি গাযত্রী হৃদযং সম্পূর্ণম্॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Gayatri Hrudayam 3 Lyrics in Bengali PDF
% File name : gAyatrI_hRRidayam.itx
% Category : hRidaya
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Sunder Hattangadi sunderh at hotmail.com
% Proofread by : Sunder Hattangadi sunderh at hotmail.com
% Source : Gayatri Mahavijnana -Pandit Rama Sharma Acharya,
% Latest update : Mar. 14, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website